# श्रीबाललीलाष्टकम्

shrIbAlalIlAShTakam

sanskritdocuments.org

March 17, 2018

# shrIbAlalIlAShTakam

# श्रीबाललीलाष्टकम्

## Sanskrit Document Information

Text title : bAlalIlAShTakam

File name : bAlalIlAShTakam.itx

Category : vishhnu, krishna, puShTimArgIya, aShTaka

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

# श्रीबाललीलाष्टकम्

(भक्तसुखदमञ्जरी ग्रन्थात्)
भज विठ्ठलबालं गोकुलपालं रसिकरसालं देहधरम् ।
भज रुक्मिणिगोदं परमविनोदं प्रकटप्रमोदं मोहकरम् ॥ १॥

भज सुन्दरवक्रं बालचरित्रं परमपवित्रं मनहारि ।
भज जयरसरूपं गोकुलभूपं परमानूपं सुखकारि ॥ २॥

जय मङ्गल मङ्गल सहज सुमङ्गल दुरितअमङ्गल जनत्राता ।
जय आनन्दकारक बहुसुखदायक ईक्षणसायकरसदाता ॥ ३॥

भज कण्डाभरणं परमसुवरणं अङ्गदधरणं रुचिकर्ता ।
भज लीलाकरणं बहुरसभरणं आधिसुहरणं भयहर्ता ॥ ४॥

भज लीलाललितं सुफलं फलितं कामसुदलितं जयकारी
जय श्रीवल्लभ क्रीडारसभर कामयुद्धकरवपुधारी ॥ ५॥

भज रुचिरं बालं प्रीतिप्रपालं नयनसुचालं शयनकरम् ।
भज पूरणवरणं भक्ताभरणं शिशुतनुधरणं सिद्धिवरम् ॥ ६॥

भज क्रीडालोलं केलिकलोलं अर्धसुबोलं पूर्णफलम् ।
जय उत्सवकारक तापनिवारक लीलास्मारक यश अमलम् ॥ ७॥

भज पूर्णानन्दं आनन्दकन्दं रमितसुछन्दं परसिन्धुम् ।
जय अनुरक्तं भक्तसंयुक्तं अव्यक्तं हरिदासविभुम् ॥ ८॥

इति श्रीबाललीलाष्टकं सम्पूर्णम् ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIbAlalIlAShTakam*

pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*